अपराह्नकालीन - II खण्ड      साहित्य      तृतीय वर्षम्

किरातार्जुनीयम् - प्रथमः सर्गः

सुखेन लभ्या दधतः कृषीवलैरकृष्टपच्या इव सस्यसम्पदः ।
वितन्वति क्षेममदेवमातृकाश्चिराय तस्मिन्कुरवश्चकासति ॥

प्रसंगः - प्रस्तुतोऽयं श्लोकः महाकवि भारवि प्रणीतस्य किरातार्जुनीयमहाकाव्यस्य प्रथमसर्गात् उद्धृतोऽस्ति । अस्मिन् श्लोके वनेचरः युधिष्ठिरं प्रति कथयति -

... (भावार्थ) दुर्योधनः चिराय प्रजापालनतत्परः सन् तत्र पथं कृत्रिम नदी (नहर) प्रभृत्युपायैः सेचनोद्योगं विधाय एवं करोति यत् तेऽत्याः कृषकाः विना प्रयासेनैव स्वयं जातानीव सस्यानि लेभिरे ।

... : - चिराय = बहुत समय से, तस्मिन् = उस दुर्योधन के, क्षेमं वितन्वति = ... = (प्रजाओं का) कल्याण कारक होने पर, अदेवमातृकाः = जो बादलों के पानी से नहीं सींचे जाते ऐसे, कुरवः = कुरुदेश, कृषीवलैः = किसानों द्वारा, सुखेन = आसानी से, लभ्याः = पाने योग्य, सस्यसम्पदः = धान्य सम्पत्तियों को, दधतः = धारण करते हुए, चकासति = शोभित हो रहे ...

Renu Devi
29 / 04 / 21

राधा उमाकान्त सं० महावि० सुरवसेना, पूर्णिया

शास्त्री द्वितीय खण्ड साहित्य

रघुवंश महाकाव्यम्

त्रयोदशः सर्गः

एते वयं सैकतभिन्नशुक्तिपर्यस्तमुक्तापटलं पयोधेः ।
प्राप्ता मुहूर्तेन विमानवेगात्कूलं फलावर्जितपूगमालम् ॥

सन्दर्भ प्रसङ्गः — प्रस्तुतोऽयं श्लोकः महाकवि कालिदास प्रणीतस्य रघुवंशमहाकाव्यस्य त्रयोदशसर्गात् उद्धृतोऽस्ति ।

अस्मिन् श्लोके, श्रीराम सीतां प्रति कथयति —

अयि सीते ! पुष्पकविमाने समारूढा वयं विमानस्य शीघ्रगत्या अतिशीघ्रं सागर पश्चिमतीरमुपागताः, यत्र वालुकामयभूमौ स्फुटिताभिः शुक्तिभिः परिक्षिप्तानि इतस्ततो विकीर्णानि मुक्ताफलपटलानि विलोक्यन्ते । यत्र च क्रमुकतरुतनयः फलैरवनताः काननस्यपूर्वां सुषमां जनयन्तीति भावः ।

व्याख्या :- एते = इमे । वयम् = विमानारूढा रामादयः । सैकतभिन्नशुक्तिपर्यस्तमुक्तापटलम् = वालुकामयस्फुटितशुक्तिपरिक्षिप्तमौक्तिकसमूहम् । फलावर्जितपूगमालम् = फलानमितक्रमुकपंक्तिः । पयोधेः = समुद्रस्य । कूलम् = तीरम् । विमानवेगात् = व्योमयानजवात् । मुहूर्तेन = अल्पकालेन । प्राप्ताः = आसादिताः, समागताः ।

Renu devi
29 / 04/21

राधा उमाकान्त सं० महावि० सुरवसेना, पूर्णिया

शास्त्री-II खण्ड

# साहित्य

## रत्नावली नाटिका

### प्रथमोऽङ्कः

प्र० (1) – अस्मिन्प्रकीर्णपटवासकृतान्धकारे
दृष्टो मनाङ्मणिविभूषणरश्मिजालैः ।
पातालमुद्यतफणाकृतिशृङ्गकोऽयं
मामद्य संस्मरयतीह भुजङ्गलोकः ॥

उत्तरम् प्रसंगः – प्रस्तुतोऽयं श्लोकः महाकवि श्रीहर्षदेव वर्धन प्रणीतस्य रत्नावली नाट्यशास्त्रस्य प्रथमोऽङ्कात् उद् धृतोऽस्ति ।
अस्मिन् श्लोके राजा विदूषकम्प्रति कथयति –

व्याख्या:– अस्मिन् = एतस्मिन् । प्रकीर्णपटवासकृतान्धकारे – प्रकीर्णः = क्षिप्तः यः पटवासः = पिष्टातकः, तेन कृतः = सम्पादितः यः अन्धकारः तस्मिन् । मणिविभूषणरश्मिजालैः – मणीनाम् विभूषणानि तेषां रश्मिजालैः (पक्षे – मणयः एव विभूषणानि, तेषां रश्मिजालैः) = रत्नालङ्कारकिरणसमूहैः । मनाक् = ईषत् । दृष्टः = विलोकितः । उद्यतफणाकृतिशृङ्गकः = उद्यतानि फणाकृतीनि शृङ्गकाणि येन तथा = उच्छ्रितफणाकारधारायन्त्रः । अयम् = एषः । भुजङ्गलोकः = विटसमूहः (पक्षे – सर्पसमूहः) (भुजङ्गोऽहौ च पिङ्गे च इति मेदिनी) । अद्य = अधुना इह = अत्र । माम् = वत्सराजम् । पातालम् = अधोलोकम् । संस्मरयति = स्मृतिपथं नयति । अत्र रसिकजनं दृष्ट्वा पातालस्मरणेन स्मरणालङ्कारः, भुजङ्गपदे च सर्पविटविश्लिष्टत्वेन श्लेषालङ्कारः । वसन्ततिलकावृत्तम् । उक्तं वसन्ततिलका तभजाजगौगः' इति ।

Renu Devi
29/04/21

छात्रा उमाकान्त सं० महावि० सुखसेना, पूर्णिया

उपशास्त्री - II खण्ड साहित्य तृतीय पत्रम्

किरातार्जुनीयं महाकाव्यम्

प्रथमः सर्गः

प्रश्न (1)- अनेकराजन्यरथाश्वसंकुलं तदीयमास्थाननिकेतनाजिरम् ।
नयत्ययुग्मच्छदगन्धिरार्द्रतां भृशं नृपोपायनदन्तिनां मदः ॥

उत्तरम् प्रसंगः - प्रस्तुतोऽयं श्लोकः महाकवि भारवि प्रणीतस्य किरातार्जुनीय महाकाव्यस्य प्रथमसर्गात् उद्धृतोऽस्ति ।

अस्मिन् श्लोके वनेचरः युधिष्ठिरं प्रति कथयति- करदैः नृपैरुपहारीकृतानां मत्तमातङ्गानां मदजलैः तत्रागतानेक राजपुत्राणां रथैरश्वैश्च सङ्कीर्णं दुर्योधनस्य सभामण्डनप्राङ्गणं पिच्छिलतां याता ।

व्याख्या:- अयुग्मच्छदगन्धिः = सप्तपर्ण (छतवन) के समान गन्धवाला, नृपोपायनदन्तिनां = राजाओं द्वारा उपहार में दिये गये हाथियों का, मदः = कपोलों से निकला हुआ जल, अनेकराजराजन्यरथाश्वसंकुलं = अनेकों राजपूतों के रथों और घोड़ों से भरे हुए, तदीयं = उस दुर्योधन के, आस्थाननिकेतनाजिरं = सभामण्डप के आँगन को, भृशं = अत्यन्त, आर्द्रतां नयति = गीला कर दे रहा है।

Ronu Devi
29/04/21

राधा उमाकान्त सं० महावि० सुरवसेना, पूर्णिया ।